ईशान स्तुतिः

ईशान स्तुतिः

रुद्राध्याय स्तुतिः (शतरुद्रीयं)

व्यास उवाच |
प्रजापतीनां प्रथमं तेजसां पुरुषं प्रभुं |
भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुं || 1 ||

ईशानं वरदं पार्थ दृष्टवानसि शंकरं |
तं गच्छ शरणं देवं वरदं भुवनेश्वरं || 2 ||

महादेवं महात्मानमीशानं जटिलं शिवं |
त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससं || 3 ||

महादेवं हरं स्थाणुं वरदं भुवनेश्वरं |
जगत्प्रधानमधिकं जगत्प्रीतमधीश्वरं || 4 ||

जगद्योनिं जगद्द्वीपं जयिनं जगतो गतिं |
विश्वात्मानां विश्वसृजं विश्वमूर्तिं यशस्विनं || 5 ||

विश्वेश्वरं विश्वनरं कर्मणामीश्वरं प्रभुं |
शंभुं स्वयंभुं भूतेशं भूतभव्यभवोद्भवं || 6 ||

योगं योगेश्वरं सर्वं सर्वलोकेश्वरेश्वरं |
सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनं || 7 ||

लोकत्रयविधातारमेकं लोकत्रयाश्रयं |
सुदुर्जयं जगन्नाथं जन्ममृत्युजरातिगं || 8 ||

ज्ञानात्मानं ज्ञानगम्यं ज्ञानश्रेष्ठं सुदुर्विदं |
दातारं चैव भक्तानां प्रसादविहितान् वरान् || 9 ||

तस्य पारिषदा दिव्या रूपैर्नानाविधैर्विभोः |
वामना जटिला मुंडा ह्रस्वग्रीवा महोदराः || 10 ||

महाकाया महोत्साहा महाकर्णास्तथापरे |
अननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः || 11 ||

ईदृशैः स महादेवः पूज्यमानो महेश्वरः |
स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः || 12 ||

तस्मिन् घोरे सदा पार्थ संग्रामे लोमहर्षणे |
द्रौणिकर्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः || 13 ||

कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत् |
ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् || 14 ||

स्थातुमुत्सहते कश्चिन्न तस्मिन्नग्रतः स्थिते |
न हि भूतं समं तेन त्रिषु लोकेषु विद्यते || 15 ||

गंधेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः |
विसंज्ञा हतभूयिष्ठा वेपंति च पतंति च || 16 ||

तस्मै नमस्तु कुर्वंतो देवास्तिष्ठंति वै दिवि |
ये चान्ये मानवा लोके ये च स्वर्गजितो नराः || 17 ||

ये भक्ता वरदं देवं शिवं रुद्रमुमापतिं |
इह लोके सुखं प्राप्य ते यांति परमां गतिं || 18 ||

नमस्कुरुष्व कौंतेय तस्मै शांताय वै सदा |
रुद्राय शितिकंठाय कनिष्ठाय सुवर्चसे || 19 ||

कपर्दिने कराळाय हर्यक्ष वरदाय च |
याम्यायारक्तकेशाय सद्वृत्ते शंकराय च || 20 ||

काम्याय हरिनेत्राय स्थाणवे पुरुषाय च |
हरिकेशाय मुंडाय कनिष्ठाय सुवर्चसे || 21 ||

भास्कराय सुतीर्थाय देवदेवाय रंहसे |
बहुरूपाय शर्वाय प्रियाय प्रियवाससे || 22 ||

उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे |
गिरिशाय सुशांताय पतये चीरवाससे || 23 ||

हिरण्यबाहवे राजन्नुग्राय पतये दिशां |
पर्जन्यपतये चैव भूतानां पतये नमः || 24 ||

वृक्षाणां पतये चैव गवां च पतये तथा |
वृक्षैरावृतकायाय सेनान्ये मध्यमाय च || 25 ||

श्रुवहस्ताय देवाय धन्विने भार्गवाय च |
बहुरूपाय विश्वस्य पतये मुंजवाससे || 26 ||

सहस्रशिरसे चैव सहस्रनयनाय च |
सहस्रबाहवे चैव सहस्रचरणाय च || 27 ||

शरणं गच्छ कौंतेय वरदं भुवनेश्वरं |
उमापतिं विरूपाक्षं दक्षयज्ञनिबर्हणं || 28 ||

प्रजानां पतिमव्यग्रं भूतानां पतिमव्ययं |
कपर्दिनं वृषावर्तं वृषनाभं वृषध्वजं || 29 ||

वृषदर्पं वृषपतिं वृषशृंगं वृषर्षभं |
वृषांकं वृषभोदारं वृषभं वृषभेक्षणं || 30 ||

वृषायुधं वृषशरं वृषभूतं महेश्वरं |
महोदरं महाकायं द्वीपिचर्मनिवासिनं || 31 ||

लोकेशं वरदं मुंडं ब्रह्मण्यं ब्राह्मणप्रियं |
त्रिशूलपाणिं वरदं खड्गचर्मधरं शुभं || 32 ||

पिनाकिनं खंडपर्शुं लोकानां पतिमीश्वरं | [खड्गधरं]
प्रपद्ये देवमीशानं शरण्यं चीरवाससं || 33 ||

नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा |
सुवाससे नमो नित्यं सुव्रताय सुधन्विने || 34 ||

धनुर्धराय देवय प्रियधन्वाय धन्विने |
धन्वंतराय धनुषे धन्वाचार्याय ते नमः || 35 ||

उग्रायुधाय देवय नमः सुरवराय च |
नमोऽस्तु बहुरूपाय नमस्ते बहुधन्विने || 36 ||

नमोऽस्तु स्थाणवे नित्यं नमस्तस्मै सुधन्विने |
नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः || 37 ||

वनस्पतीनां पतये नराणां पतये नमः |
मातृणां पतये चैव गणानां पतये नमः || 38 ||

गवां च पतये नित्यं यज्ञानां पतये नमः |
अपां च पतये नित्यं देवानां पतये नमः || 39 ||

पूष्णो दंतविनाशाय त्र्यक्षाय वरदाय च |
हराय नीलकंठाय स्वर्णकेशाय वै नमः || 40 ||

इति श्रीमहाभारते द्रोणपर्वणि त्र्यधिकद्विशतोऽध्याये ईशान स्तुतिः ||